# Yamadutakritam Shivalingarchanamahattvakhyanam

# યમદૂતકૃતં શિવલિઙ્ગાર્ચનમહત્ત્વાખ્યાનમ્

## Document Information

Text title : Yamadutakritam Shivalingarchanamahattvakhyanam

File name : yamadUtakRRitaMshivalingArchanamahattvAkhyAnam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 6 | 123-137||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# યમદૂતકૃતં શિવલિઙ્ગાર્ચનમહત્ત્વાખ્યાનમ્

યમદૂતાઃ ઊચુઃ -
નિત્યત્વેનૈવ વિધિના પ્રાપ્તં તલ્લિઙ્ગપૂજનમ્ ।
તત્કદાપિ હિ ન ત્યાજ્યં ન ત્યાજ્યં સર્વથા દ્વિજૈઃ ॥ ૧૨૩॥

લિઙ્ગાર્ચનવિહીનસ્ય સમસ્તા નિષ્ફલા ક્રિયા ।
તતઃ સર્વાર્થસિધ્યર્થં લિઙ્ગપૂજા વિધીયતે ॥ ૧૨૪॥

નિત્યકર્મસમૃધ્યર્થં નિત્યત્વેન શ્રુતં શ્રુતૈઃ ।
શિવલિઙ્ગાર્ચનં કાર્યં યત્નેન પ્રત્યહં દ્વિજૈઃ ॥ ૧૨૫॥

શિવલિઙ્ગાર્ચનં નિત્યં નિત્યમધ્યયનં તથા ।
તતઃ સર્વાર્થસિધ્યર્થં લિઙ્ગપૂજા વિધીયતે ॥ ૧૨૬॥

વિભૂતિધારણં નિત્યં નિત્યં રુદ્રાક્ષધારણમ્ ।
શિવલિઙ્ગાર્ચનં નિત્યં કુર્વન્નપિ કદાચન ॥ ૧૨૭॥

યદિ ત્યક્ષ્યતિ મોહેન પ્રત્યવૈતિ ન સંશયઃ ।
સર્વેપ્સિતાર્થદં નિત્યં સુલભં લિઙ્ગપૂજનમ્ ॥ ૧૨૮॥

ત્યક્ત્વા વૃથા જનાઃ સર્વે નરકે નિપતન્ત્યહો ।
લિઙ્ગપૂજનમાત્રેણ બહવો મુનયઃ પુરા ॥ ૧૨૯॥

યયુઃ કૈલાસનિલયમયત્નેનૈવ દુર્લભમ્ ।
લિઙ્ગપૂજાપરં શૈવં નિરીક્ષ્ય યમકિઙ્કરાઃ ॥ ૧૩૦॥

દૂરાદેવ પલાયન્તે સ્મરન્તો યમશાસનમ્ ।
ન લિઙ્ગપૂજનાદન્યન્નિઃશ્રેયસકરં પરમ્ ॥ ૧૩૧॥

સત્યમેતત્સત્યમેતત્સત્યમેતન્ન સંશયઃ ।
ઇતિ તદ્વચનં શ્રુત્વા ભાનુઃ સન્તુષ્ટમાનસઃ ॥ ૧૩૨॥

લિઙ્ગાર્ચનપરો ભૂત્વા કાશ્યાં ન્યવસદાદરાત્ ।

વીરેશનિકટે વિષ્ણુરેકપાદેન સાદરમ્ ॥ ૧૩૩॥

ચકારોગ્રં તપસ્તીવ્રં જ્વલપઞ્ચાગ્નિમધ્યગઃ ।
અશીતિયુગપર્યન્તં તપઃ કૃત્વા પુનર્મુદા ॥ ૧૩૪॥

ઇદાનીં શિવગઙ્ગાયાં કરોત્યુગ્રં તપોઽમ્બિકે ।
બ્રહ્માદયોઽપિ તે દેવાસ્તેનૈવ સહ સાદરમ્ ॥ ૧૩૫॥

તથૈવોગ્રં તપઃ કૃત્વા તિષ્ઠત્યવિકલં સદા ॥ ૧૩૬॥

તજ્જ્ઞાનવાપીજલમાદરેણ દેવાઃ સમસ્તાઃ સતતં વરેણ્યમ્ ।
જ્ઞાનૈકરૂપં વિમલં પિબન્તિ હૃલ્લિઙ્ગવૃદ્ધ્યૈ શિવલિઙ્ગનિષ્ઠાઃ ॥ ૧૩૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે યમદૂતકૃતં શિવલિઙ્ગાર્ચનમહત્ત્વાખ્યાનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૬ । ૧૨૩-૧૩૭॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 6 . 123-137..

Notes:
Yamadūta-s યમદૂતાઃ speak about the essentiality of worshiping Śivaliṅga શિવલિઙ્ગ and that the adoration of the same, is sought and attained by all the Deva-s દેવાઃ as a resultant of revering the waters of Wisdom of Jñānavāpī જ્ઞાનવાપી.

Proofread by Ruma Dewan

*Yamadutakritam Shivalingarchanamahattvakhyanam*
pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*